"यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु॥")

धारणम्। इति मेदिनी। ते, २६॥ सुखम्। इति हेमचन्द्रः। २।२२२॥ (क्रतुः। यथा, कात्यायनश्रौतसूत्रे।२०।२।८।

"राजन्यो धृतिषु युद्धजपयुक्ताः॥")

षोड़शमातृकान्तर्गतत्रयोदशमातृका। इति भवदेवः॥ अष्टादशाक्षरपादवृत्तिच्छन्दोमात्रम्। इति छन्दोमञ्जरी॥ * ॥ धृतियोगजातफलं यथा,—

"धृतियोगसमुत्पन्नः प्राज्ञः संहृष्टमानसः।
वावदूकः सभायाञ्च सुशीलो विनयान्वितः॥"
इति कोष्ठीप्रदीपः॥

धारणा। सा त्रिधा। यथा,—

"धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी॥
यया तु धर्म्मकामार्थान् धृत्या धारयतेऽर्ज्जुन!।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ! राजसी॥
यया स्वप्नं भयं शोकं विषादं मदमेव च।
न विमुञ्चति दुर्म्मेधा धृतिः सा तामसी मता॥"
इति श्रीभगवद्गीतायाम्।१८।३३-३५॥

धृत्वरी, स्त्री, (धृत्वन्+"वनो र च।"४।१।७। इति ङीप् रश्चान्तादेशः।) भूमिः। इति संक्षिप्तसारोणादिवृत्तिः॥

धृत्वा, [न्] पुं, (धरतीति। धृ+"शीङ्क्रुशिरुहिजिचीति।" उणां ४।११३। इति क्वनिप्।) धर्म्मः। विप्रः। समुद्रः। अन्तरीक्षम्। मेधावी। विष्णुः। इति संक्षिप्तसारोणादिवृत्तिः॥

धृष, आ कि अमर्षे। क्रोध इति यावत्। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) आ, धर्षितं धृष्टं तेन। कि, धर्षयति धर्षति। अमर्ष इह अभिभवः। इति भट्टमल्लः। न धर्षति निजाः प्रजाः। तमेव धर्षयत्येकं यस्तासु प्रतिकूलतीति हलायुधः। इति दुर्गादासः॥

धृष, उ संहतौ। हिंसे। इति कविकल्पद्रुमः॥ (भ्वां-परं-संहतौ अकं-हिंसे सकं-सेट्। उदित्वात् क्त्वावेट्।) उ, धर्षित्वा धृष्ट्वा। संहतिः। समूहः। इति दुर्गादासः॥

धृष, क ङ शक्तिबन्धे। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) शक्तेर्बन्धनं शक्तिबन्धः। क ङ, धर्षयते वह्निं पयः। इति दुर्गादासः॥

धृष, ञि श्ना न प्रागल्भ्ये। इति कविकल्पद्रुमः॥ (स्वां-परं-अकं-सेट्।) ञि, धृष्टोऽस्ति। श्ना, धर्षितं धृष्टं तेन। न, धृष्णोति गुरोरग्रे यः। इति हलायुधः। इति दुर्गादासः॥

धृषुः, पुं, (धृष्णोतीति। धृष्+"पृभिदिव्यधीति।" उणां १।२४। इति कुः।) दक्षः। इत्युणादिकोषः॥ संघातः। प्रगल्भः। इति संक्षिप्तसारोणादिवृत्तिः॥

धृष्टः, त्रि, (धृष+क्तः।) प्रगल्भः। इति मुग्धबोधव्याकरणम्॥ (यथा, भागवते।५।१२।७।

"जनस्य गोप्तासि विकत्थमानो
न शोभसे वृद्धसभासु धृष्टः॥")

निर्लज्जः। तत्पर्य्यायः। धृष्णक् २ वियातः ३। इत्यमरः।३।१।२५॥ धृष्णुः ४ दृष्टक् ५। इति त्रिकाण्डशेषः। धर्षितः ६। इति शब्दरत्नावली॥ चतुर्विधपत्यन्तर्गतपतिविशेषे, पुं। तस्य लक्षणं यथा, "भूयो निःशङ्कः कृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणः।" इति रसमञ्जरी॥ (चेदिवंशीयकुन्तेः पुत्त्रः। यथा, हरिवंशे।३६।२४।

"कुन्तेर्धृष्टः सुतो जज्ञे रणधृष्टः प्रतापवान्॥"

सप्तममनोः पुत्त्रविशेषः। यथा, भागवते।८।१३।२।

"मनुर्विवस्वतः पुत्त्रः श्राद्धदेव इति श्रुतः।
सप्तमो वर्त्तमानो यस्तदपत्यानि मे शृणु॥
इक्ष्वाकुर्नभगश्चैव धृष्टः शर्य्यातिरेव च॥"

धृष्णुरिति क्वापि दृश्यते॥)

धृष्टा, स्त्री, (धृष्यति स्मेति। धृष शक्तिबन्धे+क्तः। टाप्।) असती। इति शब्दरत्नावली॥

धृष्णक्, [ज्] त्रि, (धृष्णोतीति। धृष प्रागल्भ्ये+"स्वपिष्ठयोर्नजिङ्।" ३।२।१७२। इत्यत्र "धृषेश्च।" इति काशिकोक्तेर्नजिङ्।) निर्लज्जः। इत्यमरः।३।१।२५॥

धृष्णिः, पुं, (धर्षति अभिभवति अन्धकारमिति। धृष् अमर्षे+बाहुलकात् निः। स च कित्।) किरणः। इत्यमरः।१।४।३३॥

धृष्णुः, त्रि, (धृष्णोतीति। धृष्+"त्रसिगृधिधृषिक्षिपेः क्नुः।"३।२।१४०। इति क्नुः।) धृष्टः। इति त्रिकाण्डशेषः॥ (यथा, ऋग्वेदे।६।२५।५।

"न हि त्वा शूरो न तुरो न धृष्णुर्न त्वा योधो मन्यमानो युयोध॥")

पुं, कश्चिका। इति शब्दचन्द्रिका॥ (वैवस्वतमनुपुत्त्रः। यथा, हरिवंशे।१०।१।

"मनोर्वैवस्वतस्यासन् पुत्त्रा वै नव तत्समाः।
इक्ष्वाकुश्चैव नाभागो धृष्णुः शर्य्यातिरेव च॥"

सावर्णस्य मनोः पुत्त्रविशेषः। यथा, तत्रैव।७।६०।

"वरिष्णुरार्य्यो धृष्णुश्च राजः सुमतिरेव च।
सावर्णस्य मनोः पुत्त्रा भविष्या दश भारत!॥"

चन्द्रवंशीयकुकुरराजस्य सुतः। यथा, तत्रैव ३७।१८।

"कुकुरस्य सुतो धृष्णुर्धृष्णोस्तु तनयस्तथा।
कपोतरोमा तस्याथ तैत्तिरिस्तनयोऽभवत्॥"

कवेः पुत्त्रविशेषः। यथा, महाभारते।१३।८५।१३३।

"कविः काव्यश्च धृष्णुश्च बुद्धिमानुशनास्तथा।
भृगुश्च विरजाश्चैव काशी चोग्रश्च धर्म्मवित्॥
अष्टौ कविसुता ह्येते सर्व्वमेभिर्जगत्ततम्॥")

धे, ट पाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-अनिट्।) धयति। टः स्त्रियामीवर्थः। स्तनन्धयी। इति दुर्गादासः॥

धेनः, पुं, (धीयते इति धयत्यस्मादिति वा। धेट पाने+"धेट इच।" उणां ३।११। इति न इश्चान्तादेशः।) समुद्रः। इति हेमचन्द्रः॥ नदः। इति मेदिनी॥

धेना, स्त्री, (धेन+टाप्।"टित्त्वेऽपि स्वच्चैव ङीप्। इति हरदत्तोक्तेर्न ङीप्।" इति केचित्।) नदी। (दधातेर्लटः शानचि व्यत्ययेन एत्वाभ्यासलोपौ दधाना स्वमभिधेयं वर्षप्रदानेन लौकिकाय वा। यद्वा, धेट पाने 'धेट इच' इति नप्रत्ययः इकारश्चान्तादेशः गुणः। धयन्ति तामिति धेना। पानमत्र स्वीकारः। यद्वा, आस्वादः। धीयते पीयते आस्वाद्यते वानेन धयन्ति प्राणमिति धेना।" इति देवराजयज्वा। १।११।३६।) भारतीभेदः। इति हेमचन्द्रः॥ (यथा, ऋग्वेदे।३।१।६।

"वस्य धारा अस्रजद्वि धेनाः।"

"धेना माध्यमिका वाचश्च विसृजति।" इति तद्भाष्ये सायनः॥)

धेनिका, स्त्री, (धेनो नदः। लक्षणया जलसमीपस्थानम्। स उत्पत्तिस्थानत्वेनास्त्यस्या इति। धेन+ठन्। टाप्।) धन्याकम्। इति भावप्रकाशः॥

धेनुः, स्त्री, (धयति पेटि सुतान् धीयते वत्सैरिति वा। धेट पाने+"धेट इच।" उणां ३।३४। इति नुः इश्चान्तादेशः।) नवप्रसूता गौः। तत्पर्य्यायः। नवसूतिका २। इत्यमरः।२।९।७१॥ नवप्रसूतिका ३। इति शब्दरत्नावली॥ दानीयदशधेनवो यथा,—

"यास्तु पापविनाशिन्यः पठ्यन्ते दशधेनवः।
तासां स्वरूपं वक्ष्यामि नामानि च धनाधिप!॥
प्रथमा गुड़धेनुः स्याद्घृतधेनुरथापि वा।
तिलधेनुस्तृतीया च चतुर्थी जलसंज्ञिका॥
क्षीरधेनुश्च विख्याता मधुधेनुरथापि वा।
सप्तमी शर्करांधेनुर्दधिधेनुरथाष्टमी॥
रसधेनुश्च नवमी दशमी स्यात् स्वरूपतः॥
कुम्भाः स्युर्द्रवधेनूनामितरासान्तु राशयः।
सुवर्णधेनुमप्यत्र केचिदिच्छन्ति मानवाः॥
नवनीतेन तैलेन तथान्ये तु महर्षयः।
एतदेव विधानं स्यात्त एवोपस्कराः स्मृताः॥
मन्त्रावाहनसंयुक्ताः सदा पर्व्वणि पर्व्वणि।
यथाश्रद्धं प्रदातव्या भुक्तिमुक्तिफलप्रदाः॥
गुड़धेनुप्रसङ्गेन सर्व्वास्तव मयोदिताः।
अशेषयज्ञफलदाः सर्व्वपापहराः शुभाः॥
व्रतानामुत्तमा यस्माद्विशोकद्वादशीव्रतम्।
तदङ्गत्वेन चैवात्र गुड़धेनुः प्रशस्यते॥
अयने विषुवे पुण्ये व्यतीपातेऽथवा पुनः।
गुड़धेन्वादयो देयास्तूपरागादिपर्व्वसु॥"
इति मत्स्यपुराणे ७६ अध्यायः॥

पूर्व्वोक्तधेनूनां दानविधयस्तत्तच्छब्दे द्रष्टव्याः॥ * ॥

अथ कपिलाधेनुदानादिफलम्।

होतोवाच।

"अथातः संप्रवक्ष्यामि कपिलाधेनुमुत्तमाम्।